Roll No…………………………

Signature of Invigilator ………

Paper Code

BV-603

# पतंजलि विश्वविद्यालय

## University of Patanjali

### Examination June-2022

### बी.ए. व्याकरण, षष्ठसत्रम्

### व्याकरणम्, तृतीयपत्रम्

### संस्कृतसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

### (खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** ( 15 x3 =45)

1. महाकवि श्रीभवभूतेः परिचयं लिख्यताम्।

2. पृष्टेषु चतुर्षु श्लोकेषु त्रयाणां श्लोकानां व्याख्यां कुर्वन्तु -

(क) स्नेहात् समाजयितुमेत्य दिनान्यमूनि,
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय,
धर्मासनाद् विशति वासग्रहं नरेन्द्रः॥

(ख) समयः स वर्तत इवैष यत्र मां, समनन्दयत्सुमुखि! गौतमर्पितः।
अयमागृहीतकमनीयकंकणस्तव मूर्तिमानिव महोत्सवः करः॥

(ग) एतानि तानि गिरिनिर्झरिणी तटेषु, वैखानसाश्रिततरुणि तपोवनानि,
येष्वातिथेयपरमा यमिनो भजन्ते, नीवारमुष्टिपचना गृहिणोगृहाणि॥

(घ) प्रतनुविरलैः प्रान्तोन्मीलन्मनोहर कुन्तलैर्दर्शनमुकुलैर्मुग्धालोकशिशुर्दधतीमुखम्।
ललितललितैर्ज्योत्सना प्रायैरकृत्रिमविभ्रमैरकृतमधुरैरम्बानां मे कुतूहलमङ्कैः॥

3. पृष्टेषु चतुर्षु श्लोकेषु त्रयाणामर्थं लिखन्तु।

क) एवंविधं जगदिदं सकलं भगिन्यः, स्वप्नेन्द्रजालजलचन्द्रचलस्वभावम्।
मत्वा विरागमुपगच्छत यावदेतत् प्राणावशेषमुपयाति न वो विनाशम्॥

(ख) इत्थंभूते सहजविविधामेध्यजम्बालपङ्के,

कष्टं कष्टं मदनमदिराः क्षीबचित्ताः पतन्ति।

कायस्मेमां प्रकृतिमशिवां वीक्षमाणास्तु यूयं,

निर्विद्यध्वं प्रचलिततडिद्भङ्गुराज्जीवलोकात्।।

(ग) इयमसौस्फुटचन्द्रकराङ्कुरच्छुरितसौधविमाननिवासिनी।

प्रियतमाङ्क परिष्वजनोचिता, स्वपिति या वसुधा तलमण्डले।।

(घ) स्वजनबन्धु सुहृत्कमलाकर भ्रमिका दायिताङ्कविवर्तिनी।

कथमियं क्षणदाचारभैरवे, पितृवने रमतेऽद्य वराकिका।।

4. स्मरणालङ्कारं परिकरालङ्कारम् अधिकालङ्कारं सोदाहरणं विवृणु।

5. विनोक्त्यलंकारं भाविकालङ्कारं वक्रोक्त्यलंकारं च सोदाहरणं विवृणु।

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः।** **( 5 x5 =25)**

1. उत्तररामचरितस्य प्रथमाङ्कस्य सारं लिखन्तु।
2. उदात्तालङ्कारं सोदाहरणं वर्ण्यताम्।
3. विशेषालङ्कारं सोदाहरणं लिख्यताम्।
4. कुमारीकथायाः सारं लिखन्तु।
5. व्याख्या कर्त्तव्या - (सप्रसङ्गः) :-

   लौकिकानां हि साधूनामर्थं वागनुवर्तते।

   ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति।।
6. व्याख्या कर्त्तव्या - (सप्रसङ्गः) :-

   घोरान्धकार परलोकमहाप्रपातसंपातचूर्णिततनोः कुशलाभिलाषम्।

   आशीविषास्यपुटसंकटसंनिरुद्धमण्डूकवासितसमं प्रवदन्ति सन्तः।।
7. उत्तररामचरिते नाटके रामस्य भूमिका का? लिख्यताम्।
8. जगाद वदनच्छद्मपद्मपर्य्यन्तपातिनः।

   नयन् मधुलिह श्वैत्यमुदग्रदशनांशुभिः।।

   - इति कस्यालङ्कारस्योदाहरणम्? लक्षणसहितं विवृणु।

--------------x--------------